SEAL

Series : **A**

# 4522

# SANSKRIT GRAMMAR

प्रश्न–पुस्तिका क्रम संख्या
Question Booklet Sl. No.
**1350725**

अनुक्रमांक
Roll No.

परीक्षार्थी अपना अनुक्रमांक दिए गए खानों में लिखें।
Candidate should write Roll No. in the given boxes.

मुद्रित पृष्ठों की संख्या/No. of Printed Pages : **24**

कुल प्रश्नों की संख्या/Total No. of Questions : **150**

समय/Time : **3 घण्टे/Hours**

पूर्णांक/Total Marks : **600**

## परीक्षार्थियों के लिए निर्देश

1. परीक्षा प्रारम्भ होने के तुरन्त बाद, आप इस प्रश्न–पुस्तिका की पड़ताल अवश्य कर लें, कि इसमें कोई बिना छपा, फटा या छूटा हुआ पृष्ठ अथवा प्रश्नांश, आदि न हो। यदि ऐसा है, तो वीक्षक से तत्काल संपर्क कर प्रश्न–पुस्तिका बदल लेवें।
2. इस प्रश्न–पुस्तिका में **संस्कृत व्याकरण** से संबंधित कुल **150** प्रश्न हैं। **सभी** प्रश्न अनिवार्य हैं।
3. प्रदत्त उत्तर–पत्र (ओ.एम.आर. शीट) पर दिए गए निर्देशों को ध्यानपूर्वक पढ़ें तथा अपने उत्तर तदनुसार अंकित करें।
4. कृपया उत्तर–पत्र (ओ.एम.आर. शीट) पर निर्धारित स्थानों पर आवश्यक प्रविष्टियाँ करें, अन्यत्र स्थानों पर नहीं।
5. परीक्षार्थी सभी रफ़ कार्य प्रश्न–पुस्तिका के अंतिम पृष्ठों पर निर्धारित स्थान पर ही करें, अन्यत्र कहीं नहीं तथा उत्तर–पत्र (ओ.एम.आर. शीट) पर भी नहीं।

## INSTRUCTIONS TO THE CANDIDATES

1. Immediately after the commencement of the examination, you should check that this Question Booklet ***does not*** have any unprinted or torn or missing pages or items etc. If so, immediately contact the Invigilator and get it replaced with another Question Booklet.
2. This Question Booklet contains Total **150** questions of concerned **Sanskrit Grammar** subject. **All** questions are compulsory.
3. Read carefully the instructions given on the Answer Sheet (OMR) supplied and indicate your answers accordingly.
4. Kindly make necessary entries on the Answer Sheet (OMR) at the places indicated and nowhere else.
5. Examinee should do all rough work on the space meant for rough work on pages given at the end of the Question Booklet and nowhere else, not even on the Answer Sheet (OMR).



SEAL

# द्वितीय प्रश्न–पत्र
## संस्कृत व्याकरण

1. विशेषणं विशेष्यो वा __________ ।
रिक्तस्थानं पूरयत ।
   (A) न्यायतस्त्ववधार्यताम्
   (B) भाष्यस्य हि तदाशयात्
   (C) नयार्थाः षट् प्रकीर्तिताः
   (D) नह्यसोऽप्यतिसर्ववत्

2. द्योतकाः प्रादयो येन __________ ।
रिक्तस्थानं पूरयत ।
   (A) लकारः कर्मवाचक
   (B) प्रादिवच्चादिके समः
   (C) लकारो दृश्यते यथा
   (D) निपाताश्चादयस्तथा

3. पदार्थः सादृशाऽन्वेति विभागेन ________
इत्यादिकारिकायां विभागशब्देन किं विवक्षितम् ?
   (A) समानाधिकरणम्
   (B) असमानाधिकरणम्
   (C) संयोगाभावः
   (D) विश्लेषः

4. नञ् समासादौ उत्तरपदप्रधाना कमादाय भवति ?
   (A) वाच्यमर्थमादाया
   (B) द्योत्यमर्थमादाय
   (C) नञोऽर्थकत्वमादाय
   (D) नञोऽप्रतिपादकत्वमादाय

5. निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।
युक्तं वा न तु तद्युक्तं परेषां मतमेव नः ।।
इत्यत्र परेषामिति बहुवचनेन केषां सङ्ग्रहः ?
   (A) शाब्दिकनव्यानाम्
   (B) नव्यनैयायिकानाम्
   (C) मीमांसकानाम्
   (D) प्राचीननैयायिकानाम्

6. शब्दतत्त्वं ब्रह्म कतिविधं सम्मतम् ?
   (A) एकविधम्
   (B) द्विविधम्
   (C) त्रिविधम्
   (D) अनेकविधम्

7. षड्भावविकाराः कामुपाश्रिताः ?
   (A) शब्दशक्तिम्
   (B) ब्रह्मशक्तिम्
   (C) कालशक्तिम्
   (D) उत्पत्तिशक्तिम्

8. अपवर्गस्य द्वारं किम् ?
   (A) पुराणम्
   (B) व्याकरणम्
   (C) छन्दः
   (D) स्मृतिः

9. मोक्षमाणानामजिह्मा राजपद्धतिः का ?

(A) वेदविद्या

(B) तर्कविद्या

(C) ब्रह्मविद्या

(D) व्याकरणविद्या

10. ऋषीणां यज्ज्ञानं तत्किम्पूर्वकम् ?

(A) व्याकरणपूर्वकम्

(B) नियमपूर्वकम्

(C) आगमपूर्वकम्

(D) ध्यानपूर्वकम्

11. वैयाकरणमते धात्वर्थः कः ?

(A) फलमात्रम्

(B) फलव्यापारौ

(C) व्यापारमात्रम्

(D) कालव्यापारौ

12. आख्याते क्रियैकत्वव्यवस्था किमादाय सिध्यति ?

(A) अवच्छेदकबुद्धिविशेषैक्यम् आदाय

(B) आश्रयविशेषम् आदाय

(C) आश्रयसामान्यम् आदाय

(D) लिङ्गसामान्यम् आदाय

13. नैयायिकानां मते आश्रयप्रत्ययः कुतः भवति ?

(A) तिङ्प्रत्ययात्

(B) प्रथमान्तपदात्

(C) धातुतः

(D) न कस्मादपि पूर्वोक्तात्

14. व्याकरणनये 'पश्य मृगो धावति' इत्यत्र दर्शनक्रियायां कर्म किम् ?

(A) मृगः

(B) धावनम्

(C) मृगत्वजातिः

(D) पुंस्त्वम्

15. लिट्लकारः किमर्थे भवति ?

(A) अद्यतने भूते

(B) अनद्यतने भविष्यति

(C) भूते अपरोक्षे

(D) अनद्यतने भूते परोक्षे

16. नश्यति इत्यत्र आख्यातस्य कुत्र लक्षणा ?

(A) कृतौ

(B) व्यापारे

(C) प्रतियोगित्वे

(D) आश्रयत्वे

17. न्यायदृष्ट्या 'घटोऽस्ति' इत्यत्र शक्तिग्रह: कस्मात् भवति ?

(A) विवरणात्

(B) व्यवहारात्

(C) उपमानात्

(D) आप्तवाक्यात्

18. आर्यनयेयवपदेन कस्य बोधो भवति ?

(A) कङ्गो:

(B) दीर्घशूकस्य

(C) कङ्गुत्वस्य

(D) यवत्वस्य

19. शक्तं पदमिति कस्य सिद्धान्त: ?

(A) नैयायिकस्य

(B) वैयाकरणस्य

(C) मीमांसकस्य

(D) वैशेषिकस्य

20. वक्तु: इच्छा भवति

(A) आकांक्षा

(B) योग्यता

(C) सन्निधि:

(D) तात्पर्यम्

21. द्वन्द्वे च इत्यनेन निषेधो भवति

(A) समुदायसर्वनाम संज्ञाया:

(B) अवयवसर्वनाम संज्ञाया:

(C) आद्यवयव सर्वनाम संज्ञाया:

(D) चरमावयव सर्वनाम संज्ञाया:

22. "वर्णाश्रमेतरेषाम्" इति प्रयोग: अस्ति

(A) साधु:

(B) असाधु:

(C) व्युत्पन्न:

(D) अप्रयुक्त :

23. "हरि" शब्दस्य संज्ञा भवति

(A) नदी

(B) टि

(C) घि

(D) घु

24. "आङो नास्त्रियाम्" इत्यनेन भवति

(A) 'ना' आदेश:

(B) 'ना' आगम:

(C) ना भाव:

(D) नातिदेश:

25. "रा:" इति रूपमस्ति

(A) रै शब्दस्य

(B) रा शब्दस्य

(C) रि शब्दस्य

(D) रु शब्दस्य

26. "गाङ्गेय:" इत्यत्र प्रत्ययोऽस्ति

(A) ढञ्

(B) ढक्

(C) खञ्

(D) कञ्

27. "तैकायनि:" इत्यत्र क: प्रत्ययो विद्यते ?

(A) फिञ्

(B) फिन्

(C) फक्

(D) इञि

28. "वाताय कपिला विद्युत्" इत्यत्र केन वार्तिकेन चतुर्थीविभक्ति: सञ्जायते ?

(A) क्लृपि संपद्यमाने च

(B) हितयोगे च

(C) उत्पातेन ज्ञापिते च

(D) तादर्थ्ये चतुर्थी वाच्या

29. "केशेषु चमरीं हन्ति" इत्यत्र केन वार्तिकेन सप्तमी–विभक्ति: सञ्जायते ?

(A) क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्

(B) निमित्तात्कर्मयोगे

(C) साध्वसाधुप्रयोगे च

(D) कमेरनिषेध:

30. क्रियासिद्धौ प्रकृष्टोपकारकं किं संज्ञं भवति ?

(A) कर्मसंज्ञम्

(B) सम्प्रदानसंज्ञम्

(C) अपादानसंज्ञम्

(D) करणसंज्ञम्

31. नव्यन्यायमते लक्षणाया: किं बीजम् ?

(A) अन्वयानुपपत्ति:

(B) तात्पर्यानुपपत्ति:

(C) तात्पर्यज्ञानम्

(D) अर्थापत्ति:

32. न्याये उद्भिद्पदं भवति

(A) यौगिकम्

(B) योगरूढम्

(C) यौगिकरूढम्

(D) रूढम्

33. चैत्रेण तण्डुल: पच्यते इत्यत्र तृतीयार्थ: क: ?

(A) कृति:

(B) व्यापार:

(C) निरूपितत्वम्

(D) निरूपकत्वम्

34. न्याये पदं कति विधम् ?

(A) त्रिविधम्

(B) चतुर्विधम्

(C) पञ्चविधम्

(D) द्विविधम्

35. नव्यन्याये पदानां कुत्र शक्ति: ?

(A) जातौ

(B) जातिविशिष्टव्यक्तौ

(C) व्यक्तौ

(D) जातिव्यक्तौ च खण्डश:

36. कृत्संज्ञा केषां प्रत्ययानां भवति ?

(A) धातुविहितानां समेषां प्रत्ययानाम्

(B) धातुविहितानां तिङ्प्रत्ययानाम्

(C) धातुविहित तिङ्भिन्नप्रत्ययानाम्

(D) धातो: इत्यधिकारविहिततिङ्भिन्नप्रत्ययानाम्

37. धातो: ||3/1/91|| इति सूत्रस्याधिकारो विद्यते

(A) तृतीयाध्यायसमाप्त्यन्तम्

(B) चतुर्थाध्यायसमाप्ति पर्यन्तम्

(C) पञ्चमाध्यायसमाप्तिपर्यन्तम्

(D) षष्ठाध्याय समाप्तिपर्यन्तम्

38. समासस्य कति भेदाः भवन्ति ?

(A) त्रयः

(B) चत्वारः

(C) पञ्च

(D) षट्

39. प्रतिविपाशम् इत्यत्र कः समासः ?

(A) अव्ययीभावः

(B) तत्पुरुषः

(C) बहुव्रीहिः

(D) केवलसमासः

40. भ्वादिगणे कति धातवः आत्मनेपदिनः निर्दिष्टाः ?

(A) विंशतिः

(B) एकविंशतिः

(C) द्वाविंशतिः

(D) त्रयोविंशतिः

41. "आदिरन्त्येन सहेता" इति सूत्रेण कृता संज्ञा केन शब्देन व्यवह्रियते ?

(A) वृद्धिः

(B) गुणः

(C) धातुः

(D) प्रत्याहारः

42. 'ऋ' इत्यस्य वर्णस्योच्चारणस्थानं किम् ?

(A) मूर्धा

(B) दन्ताः

(C) कण्ठः

(D) तालुः

43. संयोगे 'परे' ह्रस्वं किं संज्ञं भवति ?

(A) लोपसंज्ञम्

(B) इत्संज्ञम्

(C) गुरुसंज्ञम्

(D) सवर्णसंज्ञम्

44. द्विरुक्तस्य परं रूपं किं संज्ञकं भवति ?

(A) गुरुसंज्ञकम्

(B) आम्रेडितसंज्ञकम्

(C) वृद्धिसंज्ञकम्

(D) गुणसंज्ञकम्

45. "हरये" इत्यस्य विच्छेदो भवति

(A) हरि + ए

(B) हरौ + ए

(C) हरे + ऐ

(D) हरे + ए

46. अथ शब्दानुशासनमित्यत्र महाभाष्यानुसारेण अथ-शब्दस्य प्रयोजनं किम् ?

(A) मङ्गलम्

(B) अधिकार:

(C) आनन्तर्यम्

(D) प्रश्न:

47. भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं किम् ?

(A) द्रव्यम्

(B) गुण:

(C) क्रिया

(D) आकृति:

48. उद्ग्राभं च निग्राभं चेति कस्य उदाहरणम् ?

(A) लोपस्य

(B) आगमस्य

(C) वर्णविकारस्य

(D) संहिताया:

49. ''यदधीतमविज्ञातम्'' इत्यादेस्तात्पर्यमस्ति

(A) अनर्थकं नाध्येयम्

(B) दुष्ट: शब्दो न प्रयोक्तव्य:

(C) स्वरस्य सम्यक्तया प्रयोग: करणीय:

(D) साधुशब्दप्रयोगे धर्मो भवति

50. क: परत्र अनन्तं जयमाप्नोति ?

(A) वाग्योगविद्

(B) विद्वान्

(C) धर्मविद्

(D) वाक्पटु:

51. अत्यन्तसंसृष्टात् वाक्यात्पदात् वा प्रविभागेन परिकल्पिता: ये पदार्थास्ते

(A) अपोद्धारपदार्था:

(B) अन्वाख्येया:

(C) स्थितलक्षणा:

(D) प्रतिपादका:

52. शब्दार्थयोः सम्बन्धः कीदृशः ?

(A) अनित्यः

(B) नित्यः

(C) नित्यानित्यः

(D) अनुमेयः

53. ग्राह्यत्वं ग्राहकत्वञ्चेति द्वे शक्ती कस्य भवतः ?

(A) अर्थस्य

(B) तेजसः

(C) कालस्य

(D) कस्यापि न

54. कीदृशाः शब्दाः अर्थं न प्रकाशयन्ति ?

(A) श्रुताः

(B) विषयत्वमापन्नाः

(C) गृहीताः

(D) विषयत्वमनापन्नाः

55. ध्वनिना कः गृह्यते ?

(A) स्फोटः

(B) शब्दः

(C) अर्थः

(D) बिम्बः

56. "गुरौ वसति" इति कीदृशम् अधिकरणम् ?

(A) औपश्लेषिकम्

(B) अभिव्यापकम्

(C) वैषयिकम्

(D) पूर्वोक्तं न किमपि

57. उद्देश्यगतसंख्याविशेषणादि विवक्षितम् अविवक्षितमपि इति केषां मतम् ?

(A) वैयाकरणानाम्

(B) प्राचीनमीमांसकानाम्

(C) नैयायिकानाम्

(D) नव्यमीमांसकानाम्

58. स्फोटः कतिविधः ?

(A) नवविधः

(B) अष्टविधः

(C) त्रिविधः

(D) द्विविधः

59. कस्य समासवाच्यत्वे 'अराजकीयभिन्न: राजसम्बन्धवाच्य' इति बोध: भवति ?

(A) भेदमात्रस्य

(B) संसर्गमात्रस्य

(C) भेदाभेदयो:

(D) भेदसंसर्गयो:

60. पचति इत्यादौ किंप्रकारकबोध: अनुभवसिद्ध: !

(A) पाकत्वप्रकारकबोध:

(B) व्यापारसमूहपर्याप्तिप्रकारकबोध:

(C) फूत्कारत्व-अध:सन्तापनत्व-यत्नत्वादितत्तत्प्रकारकबोध:

(D) कर्मत्वप्रकारकबोध:

61. यदा वृत्त्या संसर्गवान् अर्थ: उपस्थाप्यते तदा राजपुरुष: इत्यस्मात् कीदृशो बोध: ?

(A) राजसम्बन्धवान्

(B) राजभिन्नासम्बन्धी

(C) अराजकीयभिन्न:

(D) ऋद्धस्य राज्ञ: पुरुष:

62. 'बहूनां वृत्तिधर्माणां वचनैरेव साधने' इत्यादि कारिकायां वृत्तिधर्मत्वेन केऽभिमता: ?

(A) भेदसंसर्गौ

(B) कृत्तद्धितसमासादय:

(C) शक्तिलक्षणाव्यञ्जनारूपा:

(D) विशेषणलिङ्गसंख्याद्ययोगादय:

63. 'चित्रगु:' इत्यत्र चित्रपदे लक्षणाया: स्वीकारे भूषणकृता को दोष: प्रदर्शित: ?

(A) गोपदात् गो: अर्थबोधानापत्ति:

(B) गोस्वामी चित्र इत्यन्वयबोधापत्ति:

(C) चित्रस्वामी गौरितिबोधापत्ति:

(D) चित्रपदात् चित्रगरीनां बोधापत्ति:

64. विशिष्टशक्त्यनङ्गीकारे राजपुरुष इत्यत्र राजपदस्य सम्बन्धे लक्षणास्वीकारे को दोष: ?

(A) विग्रहवाक्यात् शक्तेरनिर्णय:

(B) राजसम्बन्धरूप: पुरुष: इति बोधप्रसङ्ग:

(C) राजसम्बन्धाश्रय: पुरुष: इति बोधप्रसङ्ग:

(D) ऋद्धस्य इति विशेषणयोगापत्ति:

65. क्लृप्त _______ तव तत्किं शक्तिं न कल्पये: ।। रिक्तस्थानं पूरयत ।

(A) शक्तिश्चास्ति

(B) त्यागश्चास्ति

(C) बोधश्चास्ति

(D) योगश्चास्ति

66. चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णय: इत्यादिकारिकायां द्विविधस्य इत्यस्य कोऽर्थ: ?

(A) यौगिकस्य

(B) रूढस्य

(C) उपसर्गनिपाताख्यस्य

(D) नामाख्यातभेदेन द्विपकारकस्य

67. न्यायदर्शनरीत्या केषां द्योतकत्वं केषां च वाचकत्वम् ?

(A) चादिनिपातां वाचकत्वमेव, उपसर्गाणां द्योतकत्वमेव

(B) चादिनिपातां द्योतकत्वमेव, उपसर्गाणां वाचकत्वमेव

(C) चादीनामुपसर्गाणाञ्च द्योतकत्वमेव

(D) चादीनामुपसर्गाणाञ्च वाचकत्वमेव

68. स वाचको विशेषाणां सम्भवात् द्योतकोऽपि च इत्यादि वाक्यपदीयरीत्या निपातानाम्

(A) वाचकत्वमेव

(B) द्योतकत्वमेव

(C) केषाञ्चिद् वाचकत्वं केषाञ्चिच्च द्योतकत्वम्

(D) निरर्थकत्वम्

69. तयोरभिधाने हि __________ नैव विद्यते । रिक्तस्थानं पूरयत ।

(A) व्यापार:

(B) वाचक:

(C) द्योतक:

(D) आख्यातम्

70. उपसर्गेण धात्वर्थो बलादन्यत्र नीतये इत्यत्र धातुपदम्

(A) निपातोपलक्षणम्

(B) उपसर्गोपलक्षणम्

(C) धातुमात्रपरम्

(D) पदान्तस्योप लक्षणम्

71. अतीन्द्रियानसंवेद्यान् पश्यन्ति.... ।

(A) आर्षेण चक्षुषा

(B) आर्षेण विवेकेन

(C) आर्षेण बुद्धया

(D) आर्षेण शक्त्य

72. ''तस्मादकृतकं शास्त्रम्'' अत्र अकृतकपदस्य कोऽर्थ: ?

(A) अनित्य:

(B) अपौरूषेय:

(C) अनुपदिष्ट:

(D) अतार्किक:

73. चक्षुष: प्राप्यकारित्वे कयो: संस्कारो भवति ?

(A) इन्द्रिय–करणयो:

(B) इन्द्रिय–धर्मयो:

(C) इन्द्रिय–विषययो:

(D) बौद्ध–वाध्ययो:

74. स्फोटरूपाविभागेन कस्य ग्रहणमिष्यते ?

(A) ध्वने:

(B) शब्दस्य

(C) व्यञ्जकस्य

(D) वर्णस्य

75. भर्तृहरिणा वाच: कति भेदा: प्रतिपादिता: ?

(A) एक एव

(B) द्वौ

(C) त्रय:

(D) चत्वार:

76. आश्रय: कासां विभक्तीनाम् अर्थ: ?

(A) प्रथमाचतुर्थीषष्ठीनाम्

(B) द्वितीयातृतीयासप्तमीनाम्

(C) चतुर्थीपञ्चमीसप्तमीनाम्

(D) तृतीयाचतुर्थीसप्तमीनाम्

77. त्रिकं प्रातिपदिकार्थ: इति पक्षे त्रीणि कानि ?

(A) व्यक्ति लिङ्गसंख्या:

(B) लिङ्गसंख्याकारकाणि

(C) संख्याकारकशब्दा:

(D) जातिव्यक्ति लिङ्गानि

78. " सप्तमीपञ्चम्यौ कारकमध्ये " इत्यत्र कारकशब्दार्थ: क: ?

(A) क्रियाजनकम्

(B) क्रिया एव

(C) क्रियाजनकत्वशक्ति:

(D) फलम् एव

79. ईप्सिततमं कर्म कतिविधम् ?

(A) त्रिविधम्

(B) चतुर्विधम्

(C) द्विविधम्

(D) सप्तविधम्

80. तिङर्थसंख्या कुत्र अन्वेति ?

(A) फले

(B) व्यापारे

(C) कर्तरि कर्मणि च

(D) काले

81. नित्यशब्द: कार्यशब्दश्च, शब्दवृषभस्य केन रूपेण वर्णितौ ?

(A) हस्तरूपेण

(B) शृङ्गरूपेण

(C) पादरूपेण

(D) शिरोरूपेण

82. "अग्न आयाहि वीतये" इत्यादिमन्त्रांश: कुत उद्धृत: ?

(A) ऋग्वेदात्

(B) यजुर्वेदात्

(C) सामवेदात्

(D) अथर्ववेदात्

83. स्थूलपृषतीम् इति कस्योदाहरणम् ?

(A) रक्षाया:

(B) लाघवस्य

(C) आगमस्य

(D) असन्देहस्य

84. "ब्राह्मणेनावश्यं शब्दा ज्ञेया:" इति किं प्रयोजनमभिलक्ष्य भाष्यकारेणोक्तम् ?

(A) रक्षा

(B) ऊह:

(C) आगम:

(D) लाघवम्

85. "तेऽसुरा हेलयो हेलय इति कुर्वन्त: पराबभूवु:" इत्यत्र महाभाष्यकारस्य तात्पर्यं वर्तते ।

(A) शब्दानुशासनमध्येयम्

(B) अपशब्दो नैवोच्चारणीय:

(C) असुरा: स्पष्टभाषणं कर्तुं नार्हन्ति

(D) ज्ञानपूर्वके प्रयोगे धर्मो भवति

86. सुब्प्रत्ययानां प्रकृतिरस्ति

(A) धातुः

(B) प्रत्ययः

(C) प्रातिपदिकम्

(D) सुबन्तम्

87. रामशब्दस्य प्रथमायाः द्विवचने भवति

(A) रामौ

(B) रामरामौ

(C) रामः

(D) रामान्

88. एकशेषो भवति ?

(A) विभक्त्यन्तानाम्

(B) प्रातिपदिकानाम्

(C) विभक्तिपराणाम्

(D) धातूनाम्

89. "सर्वस्मै" इत्यत्र "स्मै" अस्ति

(A) आगमः

(B) आदेशः

(C) विकरणम्

(D) न कोऽपि

90. "सर्वनाम" अस्ति

(A) संज्ञा

(B) आदेशः

(C) संज्ञि

(D) आगमः

91. "अमी ईशाः" इत्यत्र सन्ध्यभावस्य कारणं किम् ?

(A) प्लुतसंज्ञा-वशात्

(B) दीर्घसंज्ञा-वशात्

(C) प्रगृह्यसंज्ञा-वशात्

(D) ईत्वविधान-वशात्

92. "चिद्रूपम्" इत्यत्र सन्धिः केन सूत्रेण भवति ?

(A) झलां जशोऽन्ते

(B) ष्टुनाष्टुः

(C) तोर्लिः

(D) स्तोः श्चुना श्चुः

93. "आधारो अधिकरणम्" इत्यत्र आधारः कतिधा ?

(A) द्विधा

(B) त्रिधा

(C) चतुर्धा

(D) षड्धा

**94.** कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावसम्बन्धे का विभक्तिः भवति ?

(A) चतुर्थी

(B) पञ्चमी

(C) सप्तमी

(D) षष्ठी

**95.** ''ग्लुचुकायनिः'' इत्यत्र प्रत्ययोऽस्ति

(A) फिञ्

(B) फक्

(C) फिन्

(D) अन्यः

**96.** तत्पुरुषसमासे लक्षणावृत्तिं कः स्वीकरोति ?

(A) नैयायिकः

(B) शाब्दिकः

(C) माध्वः

(D) सौगतः

**97.** न्याये 'काकेभ्यः दधि रक्ष्यताम्' इत्यत्र कीदृशी लक्षणा

(A) जहत्स्वार्था लक्षणा

(B) जहदजल्लक्षणा

(C) लक्षितलक्षणा

(D) अजहत्स्वार्था लक्षणा

**98.** नीलो घटः इत्यत्र नीलघटयोः कः सम्बन्धः ?

(A) आधेयः

(B) अभेदः

(C) निरूपकः

(D) समवायः

**99.** एकदेशान्वयानङ्गीकारे 'चित्रगु' इत्यत्र गोपदस्य कुत्र लक्षणा ?

(A) गोस्वामिनि

(B) चित्रगोस्वामिनि

(C) गोत्वे

(D) गोत्वविशिष्टगवि

**100.** न्यायशास्त्रमते पूर्वपदे लक्षणा कुत्र भवति ?

(A) अव्ययीभावे

(B) तत्पुरुषे

(C) द्वन्द्व समासे

(D) बहुव्रीहौ

**101.** भोत्स्यते भोत्स्येते, भोत्स्यन्ते इति लृट्लकारस्य रूपाणि कस्य धातो: भवन्ति ?

(A) भुज धातो:

(B) भूष धातो:

(C) भिद् धातो:

(D) बुध् धातो:

**102.** गिरति गिलति इत्यत्र रेफस्य वैकल्पिको लकारादेश: केन सूत्रेण भवति ?

(A) अचि विभाषा

(B) कृपो रो ल:

(C) उपसर्गस्यायतौ

(D) ग्रो यङि

**103.** अवर्णान्तसर्वनाम्नो विहितस्य कस्य प्रत्ययस्य सुडागमो भवति ?

(A) ङसिप्रत्ययस्य

(B) ओस् प्रत्ययस्य

(C) आम् प्रत्ययस्य

(D) ङिप्रत्ययस्य

**104.** अच्च घे: इति सूत्रं किं किं करोति ?

(A) ओस: औत्वं, नद्या अदादेशम्

(B) ड. स: औत्वं, घे: अदादेशम्

(C) ङि: एतस्य औत्वं, घे: अदादेशम्

(D) ड. इत्यस्य औ इत्यादेशं, घे: अदादेशम्

**105.** भानो: इतिं भानुशब्दस्य रूपं कस्य प्रत्ययस्य विद्यते ?

(A) ओस्प्रत्ययस्य

(B) ङिप्रत्ययस्य

(C) ङसि प्रत्ययस्य

(D) ङेप्रत्ययस्य

**106.** अपभ्रंशशब्दानां वाचकत्वं कथं भवति ?

(A) साक्षात् सङ्केतेन

(B) साधुशब्द स्मरणेन

(C) आप्तव्यवहारात्

(D) आनुपूर्विसाम्यात्

**107.** सर्वं ज्ञानं केन भासते ?

(A) शब्देन

(B) वेदेन

(C) ध्वनिना

(D) शक्त्या

**108.** अभिव्यक्तिवादिनां मते ध्वानिभिः कस्य संस्कारो न भवति ?

(A) इन्द्रियस्य

(B) शब्दस्य

(C) शब्देन्द्रियोभयस्य

(D) अर्थस्य

**109.** सर्वादौ विश्वमेतत् कस्माद् व्यवर्तत ?

(A) कालशक्तिभ्यः

(B) ब्रह्मणः

(C) छन्दोभ्यः

(D) व्याकरणात्

**110.** विद्यासु उत्तमा विद्या काऽभिमता ?

(A) ब्रह्मविद्या

(B) वेदविद्या

(C) व्याकरणविद्या

(D) तर्कविद्या

**111.** 'वाक्यपदीयम्' इत्यस्य व्याकरणदर्शनग्रन्थस्य रचनाकारोऽस्ति

(A) पाणिनिः

(B) पतञ्जलिः

(C) भर्तृहरिः

(D) व्याडिः

**112.** भर्तृहरि मते अर्थरूपेण किम् विवर्तते ?

(A) विवर्तः

(B) स्फोटः

(C) प्रक्रिया

(D) शब्दतत्त्वम्

**113.** शब्दब्रह्मणः कां शक्तिमुपाश्रिताः जन्मादिविकाराः ?

(A) भावभेदशक्तिम्

(B) कालशक्तिम्

(C) विक्षेपशक्तिम्

(D) आवरणशक्तिम्

**114.** शब्दब्रह्मणः प्राप्तेरूपायः कः वर्तते ?

(A) वेदः

(B) इतिहासः

(C) काव्यम्

(D) पुराणम्

115. कथं महर्षिभिः शब्दार्थसम्बन्धाः समाम्नाताः ?

(A) अनिर्वचनीयाः

(B) अनित्याः

(C) नित्याः अनित्याश्च

(D) नित्याः

116. ''ज्ञानानि'' इति रूपमस्ति

(A) ज्ञानशब्दस्य

(B) ज्ञानिशब्दस्य

(C) जाशब्दस्य

(D) न कस्यापि

117. गमलृशब्दस्य षष्ठ्येकवचने भवति

(A) गमुल्

(B) गमुलः

(C) गमुला

(D) न किमपि

118. श्रीशब्दस्य प्रथमैकवचने भवति

(A) श्रीः

(B) श्री

(C) श्रिया

(D) श्रीन्

119. ''श्रियाम्'' ''श्रियि'' इति रूपद्वयमस्ति

(A) सप्तम्याः एकवचने

(B) षष्ठ्याः एकवचने

(C) प्रथमायाः एकवचने

(D) द्वितीयायाः एकवचने

120. पितृशब्दस्य प्रथमायाः द्विवचने भवति

(A) पितारौ

(B) पितरौ

(C) पित्रा

(D) पितृन्

121. सौत्रधातवः कस्मिन् गणे पठिताः कति च सन्ति ?

(A) तुदादिगणे सप्त

(B) तनादिगणे षट्

(C) रुधादिगणे पञ्च

(D) क्रयादिगणे चत्वारः

122. श्नाविकरणस्य विधानं कस्य गणस्य धातुभ्यो भवति ?

(A) दिवादिगणस्य

(B) स्वादिगणस्य

(C) रुधादिगणस्य

(D) क्रयादिगणस्य

123. 'एधिषीय' इति प्रयोगः कस्य धातोः कस्य लकारस्य च विद्यते ?

(A) इङ् धातोः लिङ्लकारस्य

(B) एध धातोः आशिष् लिङ्लकारस्य

(C) ञिइन्धीं धातोः लोट् लकारस्य

(D) उन्दीं धातोः आशिष् लिङ् लकारस्य

124. आहतुः इति रूपं कस्य धातोः लकारस्य च विद्यते ?

(A) ब्रू धातोः लट्लकारस्य

(B) ब्रू धातोः लिट्लकारस्य

(C) वच् धातोः लिट्लकारस्य

(D) अर्ह धातोः लट् लकारस्य

125. जिह्लीयात् इति विधिलिङ्लकारस्य रूपं कस्य धातोः विद्यते ?

(A) जि जये धातोः

(B) हृञ् हरणे धातोः

(C) ओहाक् त्यागे धातोः

(D) ह्री लज्जायां धातोः

126. चकारादिनिषेधोऽथ ________ ।
रिक्तस्थानं पूरयत ।

(A) व्युत्पत्त्यन्तरकल्पना

(B) वचनैरेव साधने

(C) प्रायोवादस्तथा परः

(D) बहुव्युत्पत्तिभञ्जनम्

127. 'उन्मत्तगङ्गम्' इत्यत्र अव्ययीभावः कथमव्याप्तः ?

(A) पूर्वपदार्थप्राधान्याभावात्

(B) पूर्वपदार्थप्राधान्याभावाभावात्

(C) अन्यपदार्थप्राधान्याभावात्

(D) पूर्वोत्तरपदार्थयोरप्राधान्यात्

128. समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञा कुतो न भवति ?

(A) पूर्वपदेलक्षणास्वीकारात्

(B) उत्तरपदेलक्षणास्वीकारात्

(C) अनुशासनाभावात्

(D) अर्थवत्त्वाभावात्

129. 'आख्यातं तद्धितकृतोः ________ ।'
रिक्तस्थानं पूरयत ।

(A) तत्र दृष्टो विपर्ययः

(B) यत्किञ्चिदुपदर्शकम्

(C) बहिरङ्गत्वचिन्तनम्

(D) अन्तरङ्गत्वचिन्तनम्

130. जहत्स्वार्थाऽजहत्स्वार्थे ये वृत्ती, तयोः भेद इति प्रकारस्य कोऽर्थः ?

(A) प्रागभावः

(B) अत्यन्ताभावः

(C) अन्योन्याभावः

(D) संसर्गाभावः

131. वाक्यपदीये ध्वने: कति भेदा: ?

(A) पञ्च भेदा:

(B) चत्वार: भेदा:

(C) त्रय: भेदा:

(D) द्वौ भेदौ

132. 'शब्दस्य ग्रहणे हेतु: ______ ध्वनिरिष्यते'। इत्यत्र रिक्तस्थानं पूरयतु ।

(A) प्राकृत:

(B) वैकृत:

(C) संस्कृत:

(D) उपादान

133. स्फोटनादयोर्मध्ये क: सम्बन्ध: ?

(A) उत्पाद्य-उत्पादकभाव:

(B) स्वस्वामिभावरूप:

(C) कारणकार्यभाव:

(D) व्यङ्ग्य-व्यञ्जकभाव:

134. वाक्यपदीयानुसारेण कति पदार्था: ?

(A) एकादश

(B) दश

(C) नव

(D) अष्ट

135. स्फोट: कथं सक्रम: भेदवानिव जायते ?

(A) नादस्य क्रमजातत्वात्

(B) भेदानां परिमाणात्

(C) क्रमत्वात्

(D) बिम्बप्रतिबिम्बभावात्

136. 'अनुव्यचलत्' इत्यत्र केन समास: ?

(A) 'सहसुपा' इति सूत्रेण

(B) 'गतिमतोदात्तवता तिङापि समास:' इति वार्तिकेन

(C) 'अव्ययं विभक्ति' इत्यत्र 'अव्ययम्' इति योगविभागेन

(D) ''अनुर्यत्समया'' इति सूत्रेण

**137.** भाष्योक्तदिशा समासः कतिविधः भूषणकारेणोक्तः ?

(A) चतुर्विधः

(B) पञ्चविधः

(C) षड्विधः

(D) अष्टविधः

**138.** एषु कः अजहत्स्वार्थावृत्त्या सम्बद्धः ?

(A) शून्यशक्तिवादः

(B) विशिष्टशक्तिवादः

(C) एकार्थीभाववादः

(D) व्यपेक्षावादः

**139.** 'समासे न क्वापि शक्तिः' इति केषां मतम् ?

(A) वैयाकरणानाम्

(B) बौद्धानाम्

(C) वेदान्तिनाम्

(D) नैयायिकमीमांसकानाम्

**140.** 'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्' इत्यत्र समासपदं

(A) समासपरम्

(B) कृत्तद्धितेत्यादिसूत्रपरम्

(C) वृत्तिमात्रोपलक्षणम्

(D) तद्धितादिवृत्तिव्यावर्तकम्

**141.** आर्त्विजीन इत्यस्य कोऽर्थः ?

(A) ऋत्विग्

(B) ऋत्विजमर्हति

(C) अतिथिः

(D) होता

**142.** तुरीया वाक् का ?

(A) परा

(B) पश्यन्ती

(C) मध्यमा

(D) वैखरी

**143.** समासान्तोदात्तो भवति चेत् कः समासः ?

(A) तत्पुरुषः

(B) बहुव्रीहिः

(C) द्वन्द्वः

(D) अव्ययीभावः

**144.** महाभाष्यानुसारेण सक्तुरिति पदं कस्माद् धातोर्निष्पद्यते ?

(A) सच्

(B) कस्

(C) (A), (B) इत्युभाभ्याम्

(D) नोभाभ्याम्

**145.** प्रायश्चित्तार्थं का इष्टिरपेक्ष्यते ?

(A) आग्निवारूणी

(B) वैष्णवी

(C) ब्राह्मी

(D) सारस्वती

**146.** आरोपितत्वं नञ्द्योत्यमित्यत्र आरोपितत्वं नाम किम् ?

(A) तात्पर्यग्राहकत्वम्

(B) आरोपविषयत्वम्

(C) द्योतकत्वम्

(D) अप्रधानत्वम्

**147.** षट्सु नञर्थेषु अप्राशस्त्यमित्यस्य किमुदाहरणं प्रदर्शितम् ?

(A) अपशव:

(B) अधर्म:

(C) अनुदरा कन्या

(D) अब्राह्मण:

**148.** अपापम् इत्यत्र अभावार्थकनञा कीदृशोऽभावो विवक्षित: ?

(A) अत्यन्ताभाव:

(B) अन्योन्याभाव:

(C) प्रध्वंसाभाव:

(D) प्रागभाव:

**149.** नञर्थस्य द्योत्योक्ति: कस्मात् ?

(A) नञतिरिक्तचादीनां वाचकत्वात्

(B) निपातानां वाचकत्वात्

(C) निपातानां द्योतकत्वात्

(D) प्रादीनां वाचकत्वात्

**150.** अब्राह्मण इत्यादौ तत्पुरुषत्वसिद्धि: कथम् ?

(A) पूर्वपदार्थप्राधान्यात्

(B) उत्तरपदार्थप्राधान्यात्

(C) नञ: वाचकत्वात्

(D) नञ: प्रकृते विरोधार्थकत्वात्

रफ़ कार्य / ROUGH WORK

रफ़ कार्य / ROUGH WORK